# अहमपि विद्यालयं गमिष्यामि

---

**अभ्यासः**

**प्रश्न: 1. उच्चारणं कुरुत**

अग्रिमदिने, षड्वादने, अष्टवर्षदेशीया, अनुगृह्णातु, भवत्सदृशानाम्, गृहसञ्चालनाय, व्यवस्थाये, महार्घताकाले, अद्यै वास्या:, करतलवादसहितम्।

**उत्तर:** अध्यापककस्य । अध्यापिकाया: सहायतया उच्चारण

**प्रश्न: 2. एकपदेन उत्तराणि लिखत-**

(क) गिरिजायाः गृहसेविकायाः नाम किमासीत्?
(ख) दर्शनायाः पुत्री कति वर्षीया आसीत्?
(ग) अद्यत्वे शिक्षा अस्माकं कीदृशः अधिकारः?
(घ) दर्शनायाः पुत्री कथं नृत्यति?

**उत्तर:**

(क) दर्शना।
(ख) अष्टवर्गीया।
(ग) मौलिकः।
(घ) करतलवादनसहितम्।

www.dreamtopper.in

**प्रश्न: 3. पूर्णवाक्येन उत्तरत**

(क) अष्टवर्षदेशीया दर्शनायाः पुत्री कि समर्थाऽसीत्?
(ख) दर्शना कति गृहाणां कार्य करोति स्म?
(ग) मालिनी स्वप्रतिवेशिनी प्रति किं कथयति?
(घ) अद्यत्वे छात्राः विद्यालये किं कि निःशुल्क प्राप्नुवन्ति?

**उत्तर:**

(क) अष्टवर्षदेशीय दर्शनायाः पुत्री सर्वकार्येषु समर्था आसीत्।
(ख) दर्शना पञ्च-षड्गृहाणां कार्य करोति स्म।
(ग) मालिनी स्वप्रतिवेशिनी प्रति कथयति स्म यत्-"गिरिजे! मम पुत्रः मातुल गृहं प्रस्थितः, काचिद् अन्यां कामपि महिला कार्यार्थं जानासि तर्हि प्रेषय" इति।
(घ) अद्यत्वे छात्राः विद्यालये निःशुल्क शिक्षा, गणवेशं, पुस्तकानि, पुस्तकस्यूतं, पादत्राणं, मध्याह्नभोजन, छात्रवृत्तिम् इत्यादिकं प्राप्नुवन्ति।

**प्रश्नः 4. रेखांकितपदमाधृत्य प्रश्ननिर्माणं कुरुत**

(क) मालिनी द्वारमुद्घाटयति?
(ख) शिक्षा सर्वेषां बालानां मौलिकः अधिकारः।
(ग) दर्शना आश्चर्येण मालिनी पश्यति।
(घ) दर्शना तस्याः पुत्री च मिलित्वा परिवारस्य भरणपोषणं कुरुतः स्मा

www.dreamtopper.in

**उत्तरः**

(क) का द्वारमुद्घाटयति?
(ख) शिक्षा केषां मौलिकः अधिकारः?
(ग) दर्शना आश्चर्येण काम् पश्यति?
(घ) दर्शना तस्याः पुत्री च मिलित्वा कस्य भरणपोषणं कुरुतः स्म?

**प्रश्नः 5. सन्धि विच्छेवं पूरयत**

| | | | | |
|---|---|---|---|---|
| (क) ग्रामं प्रति | – | ग्रामम् | + | ...................... |
| (ख) कार्यार्थम् | – | ...................... | + | अर्थम् |
| (ग) करिष्यत्येषा | – | करिष्यति | + | ...................... |
| (घ) स्वोदरपूर्ति | – | ...................... | + | उदरपूर्तिः |
| (ङ) अप्येवम् | – | अपि | + | ...................... |

**उत्तर:**

| | | | | |
|---|---|---|---|---|
| (क) ग्रामं प्रति | – | ग्रामम् | + | प्रति |
| (ख) कार्यार्थम् | – | कार्य | + | अर्थम् |
| (ग) करिष्यत्येषा | – | करिष्यति | + | एषा |
| (घ) स्वोदरपूर्ति | – | स्व | + | उदरपूर्तिः |
| (ङ) अप्येवम् | – | अपि | + | एवम् |

**प्रश्नः 6. (अ) समानार्थकपदानि मेलयत**

| | | | | |
|---|---|---|---|---|
| | आश्चर्येण | पठनस्य | उल्लासेन | समयः |
| | परिवारस्य | प्रसन्नतया | अध्ययनस्य | विस्मयेन |
| | कालः | कुटुम्बस्य | | |
| उत्तरम्– | आश्चर्येण | विस्मयेन | उल्लासेन | प्रसन्नतया |
| | परिवारस्य | कुटुम्बस्य | अध्ययनस्य | पठनस्य |
| | कालः | समयः | | |

(आ) विलोमपदानि मेलयत

| | | | | |
|---|---|---|---|---|
| | क्रेतुम् | दूरस्थम् | श्वः | कथयति |
| | ग्रामम् | विक्रेतुम् | समीपस्थम् | ह्यः |
| | पृच्छति | नगरम् | | |
| उत्तरम्– | क्रेतुम् | विक्रेतुम् | श्वः | ह्यः |
| | ग्रामम् | नगरम् | समीपस्थम् | दूरस्थम् |
| | पृच्छति | कथयति | | |

**प्रश्नः 7. विशेषणपदैः सह विशेष्यपदानि योजयत**

| | | | | |
|---|---|---|---|---|
| | सर्वेषाम् | बालिकानाम् | मौलिकः | विद्यालयम् |
| | एषा | बालकानाम् | सर्वकारीयम् | अधिकारः |
| | समीपस्थे | गणवेषम् | सर्वासाम् | अल्पवयस्का |
| | निःशुल्कम् | विद्यालये | | |
| उत्तरम्– | सर्वेषाम् | बालकानाम् | मौलिकः | अधिकारः |
| | एषा | अल्पवयस्का | सर्वकारीयम् | विद्यालयम् |
| | समीपस्थे | विद्यालये | सर्वासाम् | बालिकानाम् |
| | निःशुल्कम् | गणवेषम् | | |

www.dreamtopper.in